ॐ

संस्कृतरूपकाणि

२११०.

नन्दगोपालः
गोवर्धनः
शिवलीला

ಸತ್ಯನಾರಾಯಣ ಶಾಸ್ತ್ರಿ
'ನಿಸರ್ಗ'
ಮೂರನೆಯ ಕ್ರಾಸ್
ವಿದ್ಯಾನಗರ
ಶಿವಮೊಗ್ಗ
577203.

नन्द गोपालः

प्रथमोऽङ्कः

(गोपालस्य माता श्रीकृष्णपूजां निर्वर्तयति
नीराजनं कुर्वती गायति –

माता – कृष्ण, मुकुन्द, मुरारे
जय कृष्ण मुकुन्द मुरारे
करुणासागर कमलानायक
कनकाम्बर धारिन् गोपाल ॥

कालियमर्दन कंसनिषूदन
कमलायत नयन , गोपाल ॥

बालगोपाल, त्वमेव शरणं मम ।
(पूजां परिसमाप्य)
मम पुत्रः गोपालः इदानीमपि
शालातः न प्रतिनिवृत्तः ।
तस्य आगमने विलम्बस्य किं
कारणं स्यात् ? गोपाल, वत्स

गोपालः – (प्रविश्य) अम्ब, आगतवान् अहं ।
किमर्थं मां शब्दापयति भवती ?

माता – वत्स, तव आगमने विलम्बः जातः इति अहं उद्विग्ना। त्वं अद्य प्रभाते एव शालां गतवान्। इदानीं रात्रिः। विलम्बस्य किं कारणम्?

गोपालः – किं करोमि अम्ब? अद्य गुरवः मां एकं कार्यं आज्ञप्तवन्तः। मम कृते किंचित्कालं तिष्ठन्तु इति अहं मम मित्राणि प्रार्थितवान्। किन्तु ते सर्वे मां त्यक्त्वा ग्रामं ~~आगताः~~ आगतवन्तः। कार्यं परिसमाप्य शालायां पश्यामि, अहं एकाकी। रात्रिकालः, मार्गमध्ये घोरं वनम्। अम्ब, मम महद् भयमासीत्। श्वः अपि विलम्बः भवेत्। अम्ब, मया सह कमपि प्रेषयतु। अन्यथा नाहं शालां गमिष्यामि

माता :- वत्स, त्वया सह अन्यं प्रेषयितुं वयं कथं शक्नुयाम ? वयं दरिद्राः, अनाथाः । भविष्यत्-कालेतव विद्यया एव अस्माकं सुखसम्पादनम् ।

गोपालः- अहं, भवती प्रतिदिनं श्रीकृष्णपूजां करोति, स एव रक्षतु अस्मान् ।

माता :- श्रीकृष्णः !? निश्चयेन रक्षयिष्यति

गोपालः- तर्हि स एव मम कृते एकं प्रेषयतु तदा मे वने भयं न भवति

माता :- (विचिन्त्य) हाँ, अरण्ये कश्चिद् बालः स्यात् तव साहाय्यार्थं कदापि सः आगच्छेत् ।

गोपालः :- अस्माकं तस्य कः सम्बन्धः ।

माता :- सः तव अग्रजः इति चिन्तयतु ।

गोपालः- अरण्ये मम अग्रजः अस्ति वा ? तस्य नाम किम् ?

माता : गो.. पा... ल

गोपालः — (आश्चर्येण) गोपालः -
तस्य नाम अपि गोपालः वा?
यदि आह्वयामि सः आगमिष्यति
वा?

माता — आगच्छेत्, किंतु सः मायावी
यदा त्वं तं द्रष्टुं इच्छसि तदा
सः अदृश्यः भवति। अतः
त्वं धैर्येण अरण्ये सञ्चर
यदा भयं भवति (चेत्) तदा
गोपाल गोपाल इति पुनः पुनः
वदतु। तदा सः तव समीपे एव
भवति। किंतु तं द्रष्टुं पृष्ठतः
न विलोकयतु। हूम्, इदानीं
भोजनं करोतु।

गोपालः — (विस्मितः पुनः पुनः वदति)
मम अग्रजः गोपालः — गोपालः
तस्य नाम अपि गोपालः। साधु
साधु स एव मम प्रियः, इष्टः

स्व: अरण्ये यदा भयं भवति
तदा तं गोपालं आह्वयामि।
(इति वदन् निष्क्रामति)

माता: गोपाल। दीनां मां क्षमस्व
इदानीं त्वमेव मम शरणम्।
मम पुत्रं रक्षस्व

६

द्वितीयोऽङ्कः

गोपालः - गृहं गन्तुं अद्यापि विलम्बः जातः। ~~ग्रामः~~ ग्रामः दूरः, मध्ये अरण्यं घोरं, परितः अन्धकारः! किं करोमि? यदा भयं तदा गोपालं स्मर इति माता उक्तवती। गोपाल! (उच्चैः स्वरेण) गोपाला---

स्वरः - ओय

गोपालः - मम भयम्। उच्चैः स्पष्टं वदतु अग्रज, गोपाल, ~~त्वं~~ भवान् आगतः वा?

स्वरः - ओम्

गोपालः - इतोऽपि स्पष्टं वदतु। सम्यक् न शृणोमि ~~शब्दं~~ स्वरम्। वदतु गोपाल-- गोपाल

स्वरः - ओहो, बहु आग्रहः ~~त्वं~~ भवतः। अहं ~~त्वया~~ भवतैव सह आगमिष्यामि। अग्रे चरतु।

गोपालः - हाँ, अहं अग्रे चरामि। ~~कः~~ वार्ताः अपि करोमि। भवान् मध्ये मध्ये

हूँ हूँ इति वदतु।

स्वरः - हूँ इति वा?

गोपाल - हूँ तथैव। ~~त्वं~~ भवान् मम अग्रजः किल।

स्वरः - कस्मात् ज्ञातवान् तथेति?

गोपाल - ह्यः माता एव उक्तवती, ~~त्वं~~ भवान् मम अग्रजः इति। अरण्ये ~~त्वं~~ भवतः वासः वा? अरण्ये ~~त्वं~~ भवते भयं न भवति वा? अत्र किं कार्यं

हाँ, जानामि। हाँ सत्यं।

बुभुक्षा वा? ममापि!

उदकतीरे वा? तथैव भवतु।

अहं वा? कथां न जानामि भोः।

भवान् एव कथां वदतु

तां कथां जानामि।

नैव।

गोपालः :- हो, ग्रामः आगतः। भवान् अपि अस्माकं गृहं आगच्छतु।

नशक्यते वा ? किं कार्यं ?

तथा वा ? पुनः कदा आगमि-
-ष्यति ?

हाँ तथैव भवतु। अरण्ये एव।
पुनः भवन्तं आह्वयामि। हो
मां अन्विष्य अम्बा एव मार्गे
आगतवती। अम्ब! अग्रजः
गोपालः मया सह... पश्यतु

माता :-(प्रविश्य) गोपालः वा ? कः
गोपालः ? कुत्र अस्ति

गोपालः : कुत्रापि अदृश्यः। भवती एव
ह्यः उक्तवती, मम अग्रजः
गोपालः अरण्ये गाः पालयति इ
तेन सह अहं आगतवान्।

१०

माता :- (स्वगतं) कमपि गोपालं दृष्ट-
वान स्यात्। आगच्छतु ~~भो~~ वत्स, इदानीं रात्रिः। शीघ्रं गृहं गच्छामः। ~~इदानीं भोजनस्य समयः। अनन्तरं वार्ता~~ (करणीया)।

गोपालः- (कोशात् बहिः निष्कास्य संपुटं) अम्ब अम्ब सः गोपालः मम कृते फलानि दत्तवान्, पृथुकं दत्तवान्, परयतु अम्ब सुधामः पुरा श्रीकृष्णस्य कृते पृथुकमेव नीतवान्, नहि वा अम्ब!

माता :- आं, सत्यम इदानीं भोजनस्य समयः। प्रथमं भोजनं अनन्तरं वार्ता।

गोपालः- अम्ब, सः अग्रजः गोपालः मया सह बहु उक्तवान्, कथां उक्तवान्। अहं तस्यकृते एकां मयूर-पिच्छिकां दत्तवान्

(उभौ निष्क्रामतः)

तृतीयोऽङ्कः

~~(पाठशालायां गुरुः शिक्षयन् अस्ति)~~

(पाठशालायां बालाः रटन्तः सन्ति)

रमेशः आदित्यवासरः, इन्दुवासरः, भौमवासरः, बुधवासरः, शुक्रवासरः

~~गौरी~~ रमा - एए, ~~बृह~~ बुधवासरं (पृष्ठतः) पश्चात् बृहस्पतिवासरः

रमेशः अहमपि जानामि.. बुधवासरः बृहस्पतिवासरः शुक्रवासरः शनिवासरः

~~मौसी~~ रमा : हे, आचार्याः आगताः। सर्वे उत्तिष्ठन्तु।
[आचार्यः प्रविशति।]
शिष्याः:- प्रणामाः, आचार्याः

आचार्यः (उपविश्य) सर्वे यशस्विनो भवन्तु वत्साः, अस्माकं शालायां श्वः सरस्वती पूजा भविष्यति। पूजानिमित्तं सर्वे किमपि किमपि वस्तु आनयन्तु। अद्य सर्वे आगताः वा?

~~मौसी~~ रमा :- हाँ, किंतु गोपालः एकः नागतः। (दृष्ट्वा) ओ, गोपालः अपि आगतः।

~~आचार्यः~~:- ~~गोपाल~~ (गोपालः प्रविश्य गुरुं प्रणमति)

आचार्यः:- वत्स, चिरं जीव। गोपाल, किमर्थं विलम्बेन आगतः?

गोपालः:- अरण्ये मम अग्रजाः मिलिताः।

तेन सह वार्तां कृत्वा कृत्वा समय
एव व्यतीतः।
(सर्वे विस्मिताः)

गुरुः:- अग्रजः वा? तव अग्रज
एव नास्ति।

गोपालः:- अस्ति, मम अग्रजः अस्ति
अरण्ये अस्ति। सम्यक्
वेणुवादनं करोति, गायति
कथाः वदति। मां भोजयति।

:- अरण्ये किं करोति सः?

गोपालः:- गाः पालयति। तस्य
नाम अपि गोपालः।

छात्राः:- पशुपालः- गोपालः (इति पुनः
पुनः पठित्वा परिहसन्ति).

आचार्यः:- भवतु, इदं अनन्तरं पृच्छामः।
श्वः शुक्रवासरः। सरस्वती पूजा
अतः सर्वे शुभ्रवस्त्राणि धृत्वा
आगच्छन्तु॥ प्रत्येकः किमपि किमपि

वस्तु आनयतु। यथाशक्ति निवेदनं करोतु भगवत्यै।
अहं कदलीफलानि आनयामि।
अहं वर्णवस्त्रं उत्तरीयं आनयामि
अहं तु मधुराणि मोदकानि आहरामि

अहं मण्डपस्य अलंकारार्थं सुवर्ण तोरणमेव आनयामि।
अहं नानावर्णात्मकानि वलयानि क्रीत्वा आनयामि।

(गोपालः खिन्नः तिष्ठति)
~~और~~ रमा गोपालं त्वं भवान् किं आनयति ?
गोपालः निर्धनः सः किं आनयते
सर्वे :- पापः .. गोपालः निर्धनः
आचार्य :- गोपाल, अरण्ये तव अग्रजः कथित अस्ति इति उक्तवान किल, तस्मात् त्वं कलशे क्षीरं आहर।
गोपालः - आं, मम अग्रजः दास्यति। निश्चयेन क्षीरं आहरामि।

चतुर्थोऽङ्कः

(शालायां पूजासमयः। बालकाः स्वतः आनीतान् पदार्थान् परस्परं दर्शयन्तः सन्ति।)

मुरलीधरः- गोवर्धन, भवान् किं आनीतवान्

गोवर्धनः- पीताम्बरम्। भवान्?

मुरलीधरः- कण्ठहारम्। इन्दिरा, भवती?

इन्दिरा- अहमपि वर्णमयं हारं रचितवती

रमा- अहं देव्यै नानाविधानि पुष्पाणि आहृतवती। लक्ष्मी, त्वम्?

लक्ष्मी- अहं एकं रजतरथं सरस्वत्यै निर्माय आनीतवती।

(प्रविशति गोपालः। हस्ते कलशः प्रच्छन्नः)

रमा- हे, गोपाल, भवतः उपायनं किम्?

गोपालः- मम अग्रजः क्षीरं दत्तवान्। तदेव अहं आनीतवान्।

मुरलीधरः- ओ, केवलं क्षीरं वा?

(सर्वे हसन्ति)

कल्याणी- तथा परिहासं न कुर्वन्तु। गोपालः

धनिक: नास्ति। तस्य माता अन्येषु ~~मार्गेषु~~ गृहेषु सेवाकार्यं करोति।

कमला:- गुरव: आगता:। नमस्ते आचार्य

आचार्य:- हरि ओम्। सर्वे चिरं जीवत। देवी सरस्वती पूजार्थं सर्वं सिद्धमस्ति? ~~वा~~ शोभनम्। इदानीं सर्वे आगत्य सरस्वत्या: पुरत: स्वत: आनीतं वस्तु स्थापयन्तु॥ ~~ ~~ नैवेद्यार्थं क: किं आनीतवान्।

लक्ष्मी हाँ, नैवेद्यं आनेतुं विस्मृतवन्त:।

कमला ए, एष: गोपाल: क्षीरं आनीतवान्

~~श्रीदेवी~~;- किं तु तत् बहु अल्पं। तत्

इन्दिरा पर्याप्तं वा आचार्य?

आचार्य:- आम्। देवी अल्पेन तुष्यति। भक्ति: प्रधानम्। गोपाल आनय। क्षीरं अस्मिन् पात्रे पूरय।

(अन्य: बालक: गोपालस्य हस्तात्

कलशं आनीय लघुपात्रे पूरयति।

आचार्य:- मन्त्रं पठति।
ॐ पूर्णमदः पूर्णमिदं पूर्णात
पूर्णमुदच्यते। पूर्णस्य
पूर्णमादाय पूर्णमेवावशिष्यते।

~~श्रीवत्स:~~ ~~सुरेश~~ इदं पूर्णम्। (अन्ये पात्रे पूरयित्वा) इदमपि पूर्णम्।

~~गिरिधर:~~ गोवर्धन: तदपि पूर्णम्?

रमा:- सर्वाणि पात्राणि पूर्णानि। परं गोपालस्य कलशो पुनः क्षीरं अस्त्येव। आचार्य!

आचार्य:- कः विशेषः?

इन्दिरा:- गोपालः क्षीरं आनीतवान्। तत ~~अक्षय~~ अक्षय्यम् आस्ति। तस्य क्षीरेण सर्वाणि पात्राणि पूरितानि।

~~केशव~~ रमेशः - तथापि कलशे इतोऽपि क्षीरं अस्ति।
आचार्यः (विस्मितः स्वयं दृष्ट्वा)
हन्त, सत्यम्! इदं अद्भुतम्।

गोपाल, इमं ~~कलश~~ क्षीरकलशं कः।
दत्तवान्? तव जननी दत्तवती वा?
गोपालः नैव।
~~माधव~~शेखर्धर तर्हि, अरण्ये सः गोपालः!
गोपालः - आम्, मम अग्रजः गोपालः। स
एव प्रतिदिनं मया साकं अरण्ये
आगच्छति। अद्य सरस्वती पूजा।
सर्वे किमपि किमपि आनयन्ति।
~~किन्तु अहं दरिद्रः~~ किन्तु वयं
दरिद्राः। किमपि भवानेव ददातु
इति ~~पृष्टवान्~~ अहं तं पृष्टवान्
आचार्यः - प्रतिदिनं सः गोपालः त्वया सह
अरण्यात्, शालापर्यन्तं आगच्छति?
गोपालः - आम्। वेणुं वादयति। कथाः वदति
आचार्यः त्वं तेन सह वार्ता अपि कृतवान्?

गोपालः- आम्, मया सह सः क्रीडति, भोजनं करोति।

आचार्यः- तव माता अपि तं जानाति वा?
गोपालः- मम माता एव उक्तवती। सः मम अग्रजः अरण्ये भवति, यदा भयं भवति तदा तं आलपतु इति। अरण्ये प्रतिदिनं मम भयं भवति स्म। अत गोपालः प्रतिदिनं मम आगमने निर्गमने मया सह अरण्ये आगच्छति स्म।

आचार्यः गोपाल, अलं कालक्षेपेन। वयमपि ~~तव अग्र~~ तं गोपालं द्रष्टुं इच्छामः। सः कुत्र अस्तीति भवान् दर्शयतिवा?

रमा : आचार्य, अद्यतन सारस्वती पूजा?

आचार्य- देवीपूजायाः पूर्वं देवदर्शनं भवतु आगच्छन्तु, अनन्तरं विस्तरेण

वदामि। अहं तु प्रस्थितः। गोपाल, तव अग्रजस्य वासस्थानं दर्शयतु।

(गोपालः गुरुः सर्वे परिक्रामन्ति)

आचार्यः- गोपालः कुत्र?
गोपालः- अत्र।
आचार्यः- अत्र एव?
गोपालः- आम, अत्र एव मम अग्रजः गोपालः प्रतिदिनं मिलति स्म।
आचार्यः- हाँ हाँ, किन्तु इदानीं कुत्र सः?
गोपालः- अत्रैव कुत्रचित स्यात। सः गोपालनं करोति किल। ~~अ~~ इदानीं आगच्छेत।
आचार्यः- त्वं प्रतिदिनं तं आहूतवान किल?
गोपालः- आम।
आचार्यः- गोपाल। गोपाल। सर्वे शब्दयन्तु।
सर्वे:- गोपाल, गोपाल।

मुरलीधरः
~~गिरिधरः~~ :- अत्र नास्ति कोऽपि !

~~केशवः~~ रमेशः प्रायः गोपालः परिहासं कृतवान्, अस्मान् वञ्चयितुम् ।

गुरुः- गोपाल, अपि सत्यं, त्वं प्रतिदिनं दृष्टवान्, तं गोपालम् ?

गोपालः- सत्यं आचार्य, अहं कदापि असत्यं वदामि वा ?

गुरुः- तर्हि, भवानपि एकबारं आह्वयतु, ~~व~~ वयं आह्वयामः चेत् सः न आगच्छेत्

गोपालः- बाढम्, आचार्य । आर्याय गोपालाय

सर्वे- गोपालोऽपि नास्ति गोपालोऽपि नास्ति अस्य वचनं अवलम्बय वयं मूर्खाः

गुरुः- (साशङ्कम्) गोपाल, किं कारणं एवं असत्यं उक्तवान् ?

(गोपालः गुरोः पादौ पतति)

गोपालः- आचार्याः, भवन्तः अपि मां

असत्यवादिनं चिन्तयन्ति वा।
भवतु, अद्य मम अग्रजं
दर्शयित्वा एव गन्तव्यम्।
(गोपालः एक एव उन्मत्त इव
इतस्ततो धावन् वदति)

गोपालः :- अग्रज गोपाल... कृपया आगच्छतु
भवान् नागच्छति चेत् सर्वे
मम परिहासं कुर्वन्ति.. अहं असत्यं
उक्तवान् इति वदन्ति।
आगच्छतु-- आर्य.. गोपाल...
भवान् नागच्छति चेत् अहं
अत्रैव प्राणान् त्यजामि।
(इति मस्तकसंघट्टनं कर्तुं
उद्युक्तः)

स्वरः :- गोपाल, मास्तु-- एवं हठं मा
करोतु भवान्
(स्वरं श्रुत्वा सर्वे विस्मिताः)

गोपाल :- श्रुतवन्तः वा ? .. सः एव मम अग्रजस्य गोपालस्य कण्ठस्वरः
(सर्वे साश्चर्यं सर्वत्र पश्यन्ति)

आचार्य :- आम्, श्रुतः स्वरः .. किंतु स गोपालः न दृश्यते - गोपाल तं गोपालं अस्माकमपि दर्शय !

गोपाल :- आर्य

स्वरः :- तत् न शक्यम् । मम दर्शनानि तेषां इदानीं अकालः । गोपाल तव जनन्याः भक्तिं, तव मुग्धभावं ज्ञात्वा अहं त्वया सह मिलितवान् । अतः तव आचार्य अन्ये च मम दर्शनार्थं समयस्य प्रतीक्षणं कुर्वन्तु । सर्वेभ्यः स्वस्ति

गोपाल :- आर्य, एक वारं - केवलं एकवारं

आचार्याः - चिन्ता मास्तु गोपाल! भवान्
सत्यं उत्तमवान् इति वयं
जानीमः। भवान् पुण्यवान्।
अतः भवान् प्रतिदिनं श्रीकृष्णेन
सह मिलितवान्।
वत्साः, आगच्छन्तु... तं
गोपालं दृष्टवन्तः इमं गोपालं
एव वयं स्तौमः।

गायनम् - कृष्ण। मुकुन्द मुरारे

गोवर्धन:

प्रथम: अङ्क:

अनुजा - मातामह:, मातामही च अद्य अपि अस्व-
-स्थौ। मया एव गृहकार्यं सर्वं
कर्तव्यम्। आर्य, आर्य!

अग्रज:- (प्रविश्य) अनुजे, अपि मां
आहूतवती?

अनुजा - आम्, अग्रज, मम कृते एकं साहाय्यं
करोति वा? अद्य अहं एव पाकं करोमि

अग्रज:- मातामही!

अनुजा - तस्या: आरोग्यं सम्यक् नास्ति। माता-
-मह: अपि शयने बद्ध:। उभौ अपि
वृद्धौ किल। अत: अहमेव पाकं
सिद्धं करोमि।

अग्रज:- मम अपि कार्यं वदतु।

अनुजा - तर्हि तण्डुलं शुद्धीकरणं करोतु,
यावत् अहं चुल्लीं ज्वालयामि।
(नेपथ्ये कास: असकृत् श्रूयते)

मातामह:- वत्से, मम कृते जलं उष्णं अस्ति वा?

अनुजा:- आनयामि। अग्रज मातामह: उष्णं
जलं इच्छति। तत्र गच्छामि।
(निष्क्रान्ता)

~~अग्रजः- ओ देव, किमिति एवं कष्टं ददाति आनयोः मातापितरौ मृतौ। इदानीं मातामहः मातामही च वृद्धौ, रुग्णौ। अन्ये बन्धवः न सन्ति अस्माकम्~~

अग्रजः - मातामहस्य क्षीरं अपेक्षितम्। किंतु क्षीरं नास्तीति उष्णं जलं पिबति।

(नेपथ्ये पुनः कासस्य शब्दः। वेदना-सहितः श्रान्तस्वरश्च श्रूयते)

मातामही:- वत्स। वैद्यसमीपं गन्तुं शक्यते वा।

अग्रजः-अहं द्विवारं गतवान्। सः वैद्यः पर्व-दिनमिति स्वनगरं गतवान् इदानीमपि न प्रतिनिवृत्तः। ~~द~~ एकादशवादने पुनः गत्वा पश्यामि। आगतः चेत् तं एव आनयामि अथवा औषधं आहरामि।

(प्रविश्य)

अनुजा :- अग्रज, वस्तुतः मातामहः क्षीरं इच्छति। किंतु तस्य अभावात् मया उष्णं जलमेव दातव्यं आसीत्।

अग्रजः - मम अपि गोक्षीरं पातुं बहु इष्टम्। श्रीकृष्णः (अपि) प्रतिदिनं ~~[illegible]~~ गोकुले क्षीरं नवनीतं अपहरति स्म इति मातामही उक्तवती।

अनुजा :- अस्माकं गृहे ~~[illegible]~~ धेनुः (गौः) अस्ति चेत् अहं प्रतिदिनं मातामहस्य कृते ~~अग्रजः~~ क्षीरं अदास्यम्।

अग्रजः - मम कृते ?

अनुजा :- भवतः कृते अपि ददामि। मातामहस्य तु प्रतिदिनं औषधेन सह उष्णं क्षीरं दातव्यम्। ~~किमिति देवः अस्मान् दरिद्रान् कृतवान्~~

अग्रजः किमिति देवः अस्मान् दरिद्रान् कृतवान्? माता नास्ति, पिता नास्ति, धनं नास्ति धेनुः नास्ति। देवः निष्करुणः।

अनुजा शान्तं पापं। तथा न वक्तु।

हाँ, अन्यः विषयः स्मृतः। परह्यः अहं श्रुतवती, यदि वयं भक्त्या प्रार्थयाम, तर्हि श्रीकृष्णः अस्माकं कृते एकां धेनुं प्रेषयति इति।

अग्रजः- किं किम्? श्रीकृष्णः धेनुं प्रेषयति वा? धनं विना?

अनुजा :- आं, धनं विना वयं गां प्राप्नुमः। कथमस्ति उपायः? किं नु श्रीकृष्णस्य संकेतः?

अग्रजः :- मातामहं पृच्छामि॥ मातामह! (उच्चैः) श्रीकृष्णस्य स्थानं मथुरा न वा?

मातामहः :- आम, श्रीरामस्य अयोध्या, श्रीकृष्णस्य मथुरा वासस्थाने।

अग्रजः :- हां, उपायं करोमि। इदानीमेव पत्रं लिखामि श्रीकृष्णाय।

अनुजा :- अहं लिखामि

अग्रजः :- अहं अग्रजः अहमेव लिखामि

अनुजा :- अग्रज, एवं करोतु, भवान्

~~वदतु~~ पत्रं वदतु अहं लिखामि।

अग्रजः- समीचीनं।

(स्वीकरोतु पत्रं, लेखनीं च)

अनुजा- अहं सिद्धा। वदतु

अग्रजः- प्रभो, श्रीकृष्ण!

वयं दरिद्राः। किंतु अस्माकं
कृते क्षीरं बहु कष्टम्। अस्माकं
मातामहः मातामही च रोगिणौ।
यदि भवान् कृपया एकां गावं
~~अस्माकं~~ प्रेषयति चेत्, ~~अस्माकं~~
वयं धन्याः भवामः।

भवतः प्रियभक्ताः

~~भगिनि, लिख~~

अस्माकं संकेतः- कृष्णदासः
गोपीवृत्तसमीपे, श्रीरंगनाथ मार्गः, गहसंख्या २८
माधवपुरी नव्यपल्ली

[illegible]

भगिनि, लिखितवती वा, एकवारं
वाचयतु, शृणोमि।

30

[अनुजा पठति लिखितं पत्रम्

अग्रजः — हाँ, समीचीनम्। आनयतु पत्रम्

~~पिहितपत्रे लिखितं पत्रं~~

(पिहितसम्पुटे लिखितं पत्रं अन्तः स्थापयति, प्रेषयति)

इदानीं एतत् पत्रं पत्रालयपेटिकायां निवेशयामि।

अनुजा — अहमपि आगच्छामि।

मातामहि, वयं पत्रमेकं प्रेषयित्वा आगमिष्यामः।

मातामही — हाँ, शीघ्रं आगच्छन्तु।

गोकुलोङ्कंम्

द्वितीयः अङ्कः

अनुजा:- कुत्र अस्ति पेटिका, पत्रं निक्षेप्तुम्
अग्रजः- (नेपथ्यं दर्शयित्वा) तत्र अस्ति। तस्य अन्तः इदं क्षिपामि।
(इति निष्क्रामति। पुनः पत्रेण सह प्रविश्य)
ओह् पेटिका बहु उन्नता अस्ति। अहं न प्राप्नोमि। किं कुर्मः?
अनुजा: (परितः विलोक्य) अग्रजः तत्र एकः गोपालकः आगच्छति। सः उन्नतः अस्ति। तस्य साहाय्यं प्रार्थयामः। स एव इदं पत्रं पेटिकायां स्थापयतु।
अग्रजः- तथैव भवतु।
(एकः गोपालकः दण्ड-कम्बल युक्तः प्रविशति)
भद्र, गोपालक, कृपया उपकरोति वा!
गोपालकः- अस्तु, किं करणीयम्?

अग्रजः! इदं पत्रं प्रेषणीयम्। किन्तु पत्रालयपेटिका उन्नता अस्ति कृपया भवान् इदं पत्रं तस्मिन् निक्षिपति वा?

गोपालकः- भवतु। आनयतु पत्रं। (स्वीकरोति)

अनुजाग्रजौ:- ओह, विलम्बः जातः। मातामहस्य औषधं देयं आसीत् वयं गच्छामः। भद्र कृपया तत् पत्रं पेटिकायां क्षिपतु। (इति उक्त्वा त्वरायां उभौ निष्क्रामतः) मा विस्मरतु।

[illegible]

गोपालकः- बालाः बहु मुग्धाः इव दृश्यन्ते। गुरूणां शुश्रूषां अपि कुर्वन्ति, आश्चर्यम्! इदं शीघ्रं निक्षिप्य गच्छामि मम गावः अपि शीघ्रं ग्रामं नेतव्याः। (पत्रं दृष्ट्वा संकेत होनं विज्ञाय)

गोपालकः — किं भोः, पत्रस्य उपरि संकेतः एव नास्ति ? (अग्रे दृष्ट्वा)
भो बालकाः ! हन्त गतवन्तौ एव । इदानीं किं करोमि ?
हाँ, पत्रं दृष्ट्वा कस्य कृते लिखितं इति जानामि ।
(पत्रं उद्घाट्य) (वाचयति)
(किमपि चिन्तयित्वा, शिरः कम्पयित्वा, पत्रं स्ववस्त्रे स्थापयति निष्क्रामति)

द्वारकाङ्कः

तृतीयः अङ्कः

मातामही :- एतावत्पर्यन्तं कुत्र गतवन्तौ ?
मातामहः :- किमपि पत्रं प्रेषयितुं इति उक्तवन्तौ
किल! किं पत्रं स्यात्? कस्य कृते
प्रेषणीयम्? किमर्थम्?
मातामही :- सर्वं कार्यं कुरुतः। कियन्तः भाग्यहीना
वयम्। एतयोः मातापितरौ दुर्घटनायां
मृतौ। वृद्धौ रोगिणौ आवामपि
तयोः परिपालने निस्सहायकौ। ~~तयोः~~
~~[illegible]~~ न केवलं तौ न वर्धयावः,
तयोरेव आवां भारभूतौ। तयोः
कार्यभारं दृष्ट्वा हृदयं तपति। परं
नु तौ भारं अविगणय्य इव सदा
मुग्धभावेन हसन्तौ कार्यं कुरुतः।
किमर्थं देवः ईदृशः दयाहीनः,
इति न जाने।
मातामहः :- अस्माकं जन्मान्तरं कर्म एव एवं
बाधते। (कासः आरभते)
(पानीयार्थं संज्ञां करोति। किंतु
मातामही उत्थातुं अशक्ता। तया

(द्व दौहित्रौ प्रविशतः)

अनुजा:- अग्रज! मातामहः कासेन पीड्यते। शीघ्रं जलं आनयतु पातुम्।

(अग्रजः अन्तः गत्वा चषके जलं आनीय पाययति)

मातामहः चिरं जीव दौहित्र! सकाले आगतवान् त्वम्।

मातामही:- कुत्र गतवन्तौ?

(अनुजाग्रजौ परस्परं मुखं विलोकयतः)

मातामही:- वदन्तु, कुतः भयम्? कुत्र गतवन्तौ

अग्रजः:- गृहे क्षीरस्य आवश्यकता अस्ति। किंतु प्रतिदिनं क्षीरं क्रेतुं न शक्नुमः। अतः एकां धेनुं प्राप्नुमः चेत्

मातामही:- साधु! किन्तु अस्माकं प्रार्थनां कः शृणुयात्? धनं विना को वा क्षीरं यच्छेत् धेनुं वा प्रेषयेत्?

अनुजा:- कृष्णः, श्रीकृष्णः

मातामहः:- (प्रयासेन हसित्वा) कः! कृष्णः! सः शृणुयात्? ~~स~~ प्रथमं सः कथं

जानीयात्, वयं दरिद्राः रोगिष्ठाः
अनाथाः ~~च~~, प्रतिदिनं अस्माकं
क्षीरं अपेक्षितं, अतः एका धेनुः
प्रेषयितव्या इति? हहह, मुग्धता
मुग्धता बालानाम् विचित्रम्..
(उभौ हसतः सविषादम्)
अग्रजः- तदर्थमेव एकं पत्रं लिखितवन्तः!
मातामही:- पत्रं वा? कं प्रति? किमिति?
अनुजः:- श्रीकृष्णं प्रति पत्रं लिखितवन्तः!
~~[illegible]~~ भवतः समीपे ~~[illegible]~~ अनेकाः
गावः सन्ति। तासु एकां अस्माकं
कृते प्रेषयतु इति
अग्रजः:- निश्चयेन प्रेषयेत्, न वा,
मातामहि!
मातामही:- हाँ, प्रेषयेत्, किंतु तस्य
संकेतं कथं जानीमः? अस्माभिः
लिखितं पत्रं ~~तस्य~~ तं श्रीकृष्णं
गच्छेत् किल!
अग्रजः:- तन्निमित्तमेव श्रीकृष्णस्य

मधुरा संकेतं प्रति पत्रमेकं लिखित्वा इदानीमेव पत्रालयपेटिकायां निक्षिप्य आगतवन्तौ आवाम्।

मातामहः:- किमिति, किमिति... श्रीकृष्णः, मधुरा इति वा? (मातामह्याः मुखं सविषादं पश्यन्ति)

अग्रजः:- (संशयेन) हाँ? लिखितवान् वा, न जानामि। प्रायः विस्मृतवान्।

अनुजा:- अहं स्मरामि, पत्रे संकेतं अहं लिखितवती।

अग्रजः! सत्यम्, पत्रे संकेतः लिखितः। किन्तु पिहितपत्रस्य उपरि पुनः संकेतः लेखितव्य आसीत्।

अनुजा:- ओहो, अहं तत् पिहितपत्रं संश्लेषयितुमपि विस्मृतवती।

मातामही:- भवन्तौ संश्लेषितुं विस्मृतवन्तौ

मातामहः:- भवान् ~~भ~~ बहिः संकेतं लेखितुं विस्मृतवान्।

अग्रजानुजौ: तर्हि ~~तत्~~ अस्माकं पत्रं

यावत् बालौ शालायाः आगतौ तावदेव कश्चन अज्ञात्य
गोष्ठागारं निर्माय गां बद्ध्वा गतवान् आसीत्

३८

श्रीकृष्णं न प्राप्स्यति ?

मातामहो - मातामहः - मुग्धौ, मुग्धौ

(गृहात् बहिः गोः रुतः श्रूयते)

सेवकः - (प्रविश्य) श्रीकृष्णं प्रति गां प्रेषयितुं पत्रं कः लिखितवान् ?

मातामहः - एतौ एव मुग्धौ । पत्रं लिखितवन्तौ किन्तु संकेतमेव लेखितुं विस्मृतवन्तौ ।

सेवकः - यथा भवद्भिः ईप्सिता तथैव एका गौः अस्माकं स्वामिना प्रेषिता आस्ति।

अग्रजानुजौ ! कुत्र, कुत्र अस्ति गौः ?

सेवकः - अहमेव आनीतवान् । बहिः स्थापितवान् । कृपया तां धेनुं स्वीकुर्वन्तु । अहं गच्छामि वा

मातामहः - भोः तिष्ठतु ! अस्मदर्थं कः प्रेषितवान् इमां गाम् ?

सेवकः ! - श्रीकृष्ण इत्येव जानन्तु

— • —

प्रथमः अङ्कः।

सैनिकः ÷ शृण्वन्तु भो! शृण्वन्तु।
अद्यतना राजाज्ञा। ~~सर्वे~~ सर्वैः
स्वगृहेभ्यः कुम्भपूर्णं जलं श्वः
राजगृहं प्रति आनेतव्यम्।

प्रजासु एकतमः – किमर्थं भोः?

सैनिकेषु अन्यः – तत् तत्र कथ्यते।

प्रजासु द्वितीयः – किमिति प्रतिदिनं यत्कि-
-मपि कार्यं प्रजाभ्यः आज्ञाप्यते।
राजा अस्मान् किं चिन्तयति?
मूर्खाः इति वा, जडाः इति
वा? सर्वाधिकारेण एषः प्रमत्तः

प्रजासु तृतीयः – स्वबुद्धिः नास्ति,
सचिवानां सूचनानि न
शृणोति। एवं चेत् अस्माकं
का गतिः।

सैनिकः – अपि सर्वे श्रुतवन्तः?
अनन्तरं न श्रुतं, न ज्ञातं
इति उक्तं चेत् क्षमा नास्ति।
अविनीतान् महाराजः घोरं शिक्षति।

वृद्धा - (अश्रुत्वा, कम्पित स्वरेण)
किं भो, किमुक्तम्?
प्रजा - राजाज्ञा, राजाज्ञा!
वृद्धा - हूँ राजाज्ञा, किमिति?
प्रजा -
अस्माभिः सर्वैः स्वं राज-
गृहं प्रति कुम्भपूर्णं जलं
नेतव्यमित्याह।
वृद्धा - किमर्थं?
प्रजा - तत् इदानीं न जानीमः (ज्ञायते
वृद्धा किं तु मादृशाः वृद्धाः
जलं वोढुं अशक्ताः किल।
सैनिकाः - तथा वञ्चयितुं अवकाशः
नास्ति। सर्वैः एषा राजाज्ञा
परिपालनीया। यदि यः कोऽपि
आक्षिपति ~~तर्हि~~ अथवा प्राति-
वदति तर्हि क्रूर दण्डः विधी
यते
वृद्धा - अहं अशक्ता, कुम्भं जलं

आनेतुं अनर्हा इति वदामि। अत्र वञ्चना का? ~~●~~ ह्यः सूर्योदय समये राजगृहं आगन्तुं आज्ञप्ताः सर्वाः प्रजाः। यदा वयं महता कष्टेन तत्र आगताः राजा एव नागतः। किमिति तत्र सर्वेषां मेलनं कृतं ~~स्त्रुके~~ इति पृष्टे केनापि न ज्ञातम्। एवं प्रतिदिनं प्रजाः दण्डयितुं महाराजाय कः अधिकारं दत्तवान्?

सैनिकः:- तव पिता! मूढे, वाचाले, त्वं प्रथमं शिक्षितव्यासि। तव कृते विशेषा राजाज्ञा, शृणु श्वः सूर्योदये राजद्वारे उपस्थातव्यम्। तत्र भूशुद्धिः त्वया करणीया। ततः वृक्षेभ्यः जलं सेचितव्यम्। राजसत्त्रे सर्वेषां भोजनानन्तरं पात्राणि प्रक्षाल्य अन्ते दत्तं चेत् भोक्तव्यम्।

यदि तव कृते दत्तानि कार्याणि न कृतानि, तव मृत्युदण्डं भविष्यति, स्मर।

शृण्वन्तु सर्वे यदि राजाज्ञां उपेक्षन्ते तदा भवतामपि एवमेव तीक्ष्णदण्डः भविष्यति।
शृण्वन्तु, शृण्वन्तु.

वृद्धा:- एतद् न्याय्यं वा? अहं अनुचितं किं उक्तवती।

वृद्धया मया तत्सर्वं कर्तुं अलं वा! (कोऽपि न प्राति वदति) भवतु। सर्वे बालकाः

राजाज्ञानुसारं सर्वाणि कार्याणि
करणीयानि किल। कमपि पृच्छामि
मम परतः तत्सर्वं करोतु
अहं मम शक्त्यनुसारं धनं
दास्यामीति

(तदा एकः किंकरः प्रत्यक्षः
भवति)

भोः, भवान् किंकरः वा

किंकरः - आम, अम्ब, धनार्थं अहं
यत्किमपि करोमि

वृद्धा - तर्हि श्वः राजगृहे मम परतः
कार्याणि करोति वा भवान्
कति धनं देयम्?

किंकरः - ~~[illegible]~~ धनं मास्तु

वृद्धा - तत् कथं भवति। भवान् मम
कार्यं करोति चेत्, मया
धनं स्वीकर्तव्यमेव। कियत् देयं, वदतु

किंकरः तर्हि यत्किमपि ददातु। प्रथमं

किंकरः कार्यं वद कृ.

वृद्धा एकं कार्यं न, बहूनि कार्याणि करणीयानि।

~~किमिति बहूनि कार्याणि?~~

वृद्धा – सूर्योदय समये एव राजद्वारं गत्वा भूशुद्धिः करणीया। अनन्तरं तत्र स्थितेभ्यः वृक्षेभ्यः जलं सेचनीयम्। राजसत्रे पात्रादिकं प्रक्षाल्य अन्ते भोजनं करणीयम्

किंकरः – बाढम्। तर्हि अहं श्वः सूर्योदयसमये एव राजगृहं गमिष्यामि राजकार्यं करोमि। (निष्क्रामति)

वृद्धा – अस्य चर्या विचित्रा वर्तते। सर्वं कार्यं करोमि इति वदति किंतु धनं न स्वीकरोमि इदानीं इति वदति। एषः कः स्यात्? प्रायः अहं वृद्धा इति दयालुना परमात्मना प्रेषितः स्यात्। चिरं जीव भद्र, चिरं जीव

न.कृ. जोशी
म.स. शिन्दे
नरेन्द्र ४

द्वितीयः अङ्कः

(राजसभा। राज्ञः पुरतः अनेके दासाः। तेषां कशाप्रहारः प्रवर्तते। तेषां शरीराणि क्षतविक्षतानि। रक्तार्द्रदेहैः तैः रुद्यते। किन्तु राजा तत्र सन्तुष्यति)

राजा :- हाँ, अनन्तरम्।

मन्त्री :- (आवलिं दृष्ट्वा निवेदयति) एकोत्तरशततमः अपराधी। अद्य कार्याय सकाले नागतवान्। (विलम्बेन आगतवान्)

राजा :- अस्य दश कशाप्रहाराः। तथैव पञ्चाशत् नाणकानां दण्डः। हाँ, ततः।

(सः नीयते)

मन्त्री :- द्व्युत्तरशततमः अपराधी। शिरोबाधः इति व्याजेन शकटनिर्माणकार्यं न पूरितवान्। अस्मभ्यं अनुक्त्वा वैद्यालयं गतवान्।

राजा :- तस्य शिरोबाधस्य औषधं इदानीं दीयते अस्माभिः। विंशतिप्रहाराः तथैव दिनपूर्णं निराहारः।

(सर्वे असन्तुष्टाः नीयमानं तं पश्यन्ति)

(वृद्धया: सेवक: आनीयते)

राजा :- क: एष: पुन: अस्माकं उपरोधकारी

भट: :- महाप्रभो! एष: कार्यार्थं इदानीं राजद्वारं प्रविष्टवान्।

मन्त्री :- कदा आगन्तव्य आसीत?

भट: :- सूर्योदय समये एव राजद्वारे भूशुद्धि अनेन करणीया आसीत

मन्त्री :- तत:

भट: :- अनन्तरमपि बहूनि कार्याणि तेन करणीयानि किं तु न कृतानि

राजा :- एतावान् दर्प वा अस्य? क: एष अविधेय:?

भट: :- महाप्रभो! या वृद्धा ह्य: राजाज्ञां उल्लंघितवती, तस्या: सर्विष्ठाया: पश्चात् प्रविष्ट: एष: अपि बहु विलम्बेन आगतवान्। किमपि कार्यं न कृतवान्॥ किं कारणं इति पृष्टे राजसमीपे वदिष्यामि

इति एषः वराकः वदति।
राजा :- आहूह कियान् अधिकप्रसङ्गः।?
किं रे दास्याःपुत्र, किमर्थं अत्र आनीतः त्वं इति जानासि?
सेवकः- भवन्तं द्रष्टुम् इति जानामि।
राजा :- द्रष्टव्यं इतः परमपि अस्ति।
~~करालं, एव सक्रूरं दण्डितव्यः।~~
~~प्रथमं~~ रे तवकृते यतं किं किंकार्यं कृतवान्।
सेवकः- अहं वा? किमपि न करोमि!
राजा :- तर्हि ?
सेवकः- केवलं कारयामि। अहं न कर्ता।
राजा :- अहमपि इदानीं कारयामि। रे कराल ~~प्रथमं~~ एषः सक्रूरं ~~[illegible]~~ दण्डयितव्यः।
प्रथमं दुर्विनीतस्य अस्य कृते द्विशतं कशाप्रहारं ताडयतु। ततः ~~[illegible]~~ दुरालापिनः अस्य जिह्वां कर्तयतु। अन्ते नगरस्य महाद्वारे अस्य शिरश्छेदनं करणीयम्।

मन्त्री ! तदा प्रजाभिः ज्ञायते कियान्
अनुशासनपरः अस्माकं राजा इ
राजा !- अहह, साधु, भवान् खलु दक्षः
मम अधिकारं जानाति
मन्त्री !- किं रे कराल, किं पश्यसि।
अस्मै कशाप्रहारं आरभस्व।
करालः!- यथा राजाज्ञा।
(रंगमध्ये सेवकं स्थापयित्वा
~~~~ एकैकं गणयित्वा प्रहरति)
एकम् (राजा दिग्भ्रान्तः)
द्वे (राजा — हा
त्रीणि (राजा - हहहा... तिष्ठ रे
चत्वारि (राजा - तिष्ठरे... मां बाधते
तस्मै वेत्रः प्रहारः)
मन्त्री !- तिष्ठ, कराल! अहं शिक्षयामि
एकं (इति ताडयित्वा स्वयं
वेदनां अनुभवन् भूमौ पतति
~~~~

राजा: अत्र ~~का~~ कापि माया विद्यते। तां वृद्धां आनयन्तु। यदि तां शिक्षयामः तदा सत्यं ज्ञातं भवति।

मन्त्री :- गच्छ रे, आनय तां वृद्धाम्।

(~~कि~~ राजभटः एकः गच्छति। जनेषु कोलाहलः। अज्ञातः सेवकः अपि अदृश्यः भवति)

वृद्धा :- (प्रविश्य) महाराज, इदानीमपि करणीयं अस्ति?

राजा :- कपटवृद्धे, त्वं किमपि मान्त्रिका कृतवती वा? इदानीं ज्ञास्यसि। रे कराल अस्यै कशाया प्रहर। यावत् वदनं उद्घाट्य सत्यं वदति।

करालः :- यथा राजाज्ञा।

(वृद्धायै प्रहरति। किन्तु एकैकेन प्रहारेण अपि प्रथमं राजा, ततः मन्त्री, तथैव अन्ये वेदनां स्वतः शरीरे अनुभवन्ति वृद्धा तु चक्षुः निमीलयन्ती स्थिता)

राजा, सर्वे ! प्रहारं स्थगयत रे, महती वेदना।

वृद्धा :- अशक्तान् निरपराधिनः दण्डयित्वा कः अनुभवः इति इदानीं ज्ञातः वा महाराज ?
(महाराजः खिन्नः। अवनत मुखः)

एतावता जानन्तु सर्वत्र शिवभाव सर्वः अपि शिवात अभिन्नः।

राजा :- अम्ब, अद्य सत्यं ज्ञातम्। अहं क्षन्तव्यः। अजानता मया एतावत्पर्यन्तं पापः आचरितः।
मन्त्री :- किं तु अनया प्रेषितः सिंकरः कः ? सः कुत्र अस्ति ?
(सर्वे पारितः, सर्वत्र पश्यन्ति सः अदृश्यः)
वृद्धा :- सः सर्वत्र सर्वेषु अस्ति। मूर्खाः न पश्यन्ति। ज्ञानिनः सर्वत्र तमेव पश्यन्ति। परोक्षप्रिय

भक्त प्रार्थना

ಮೋಹಿತ್

ಆರನೆಯ ತರಗತಿ

ಎಸ್.ಎ.ವಿ. ಕನ್ನಡ ಶಾಲೆ

ENGLISH,

Homework.



TIME TABLE

A.M.

MONDAY

TUESDAY

WEDNES